श्री महेश्वर पंचरत्न स्तोत्रं

श्री महेश्वर पंचरत्न स्तोत्रं

प्रातः स्मरामि परमेश्वरवक्त्रपद्मं
फालाक्षिकीलपरिशोषितपंचबाणं |
भस्मत्रिपुंड्ररचितं फणिकुंडलाढ्यं
कुंदेंदुचंदनसुधारसमंदहासं || 1 ||

प्रातर्भजामि परमेश्वरबाहुदंडान्
खट्वांगशूलहरिणाहिपिनाकयुक्तान् |
गौरीकपोलकुचरंजितपत्ररेखान्
सौवर्णकंकणमणिद्युतिभासमानान् || 2 ||

प्रातर्नमामि परमेश्वरपादपद्मं
पद्मोद्भवामरमुनींद्रमनोनिवासं |
पद्माक्षनेत्रसरसीरुह पूजनीयं
पद्मांकुशध्वजसरोरुहलांछनाढ्यं || 3 ||

प्रातः स्मरामि परमेश्वरपुण्यमूर्तिं
कर्पूरकुंदधवळं गजचर्मचेलं |
गंगाधरं घनकपर्दिविभासमानं
कात्यायनीतनुविभूषितवामभागं || 4 ||

प्रातः स्मरामि परमेश्वरपुण्यनाम
श्रेयः प्रदं सकलदुःखविनाशहेतुं |
संसारतापशमनं कलिकल्मषघ्नं
गोकोटिदानफलदं स्मरणेन पुंसां || 5 ||

श्रीपंचरत्नानि महेश्वरस्य
भक्त्या पठेद्यः प्रयतः प्रभाते |
आयुष्यमारोग्यमनेकभोगान्
प्राप्नोति कैवल्यपदं दुरापं || 6 ||

इति श्रीमच्छंकराचार्य कृतं महेश्वर पंचरत्न स्तोत्रं |